(619) "जॄ वयोहानौ" (X-चुरादिः-1815.अक. सेट्. उभ. आधृषीयः।)

'जृणाति जीर्यति जरत्येकार्थे जारयत्यपि।' (श्लो. 39) इति देवः।

अस्य धातोराधृषीयत्वेन 'आधृषाद्वा' (ग. सू. चुरादौ) इति णिज्विकल्पः; णिजभावपक्षे, जारकः-रिका, जिजरीषकः-जिजरिषकः-जिजीर्षकः-र्षिका, जेजिरकः-रिका;

इत्यादीनि, णिच्पक्षे जारकः-रिका, जारयिता-त्री, इत्यादीनि च रूपाणि जृणातिवत् (618) बोध्यानि। णिजभावपक्षे शुद्धाद्धातोः 'शेषात् कर्तरि परस्मैपदम्' (1-3-78) इति शास्त्रात् परस्मैपदमेव। तदानीं शतरि [A]जरन्-न्ती इति रूपमिति विशेषः। ण्यन्तात् सनि तु—जिजारयिषकः-षिका, जिजारयिषिता-त्री, जिजारयिषन्-न्ती, जिजारयिषिष्यन्-न्ती-ती, जिजारयिषमाणः, जिजारयिषिष्यमाणः, जिजारयिट्-यिषौ-यिषः, जिजारयिषितः-तवान्, जिजारयिषुः, जिजारयिषितव्यम्, जिजारयिषणीयम्, जिजारयिष्यम्, ईषज्जिजारयिषः-दुर्जिजारयिषः-सुजिजारयिषः, जिजारयिष्यमाणः, जिजारयिषः, जिजारयिषितुम्, जिजारयिषा, जिजारयिषणम्, जिजारयिषित्वा, प्रजिजारयिष्य जिजारयिषम् २ जिजारयिषित्वा २, इति रूपाणि इति विशेषः।

(620) "जॄष् वयोहानौ" (IV-दिवादिः-1130. अक. सेट्. पर.)

'जृणाति, जीर्यति, जरत्येकार्थे जारयत्यपि।' (श्लो. 39) इति देवः।

धातोरस्य सन्नन्तात्, यङन्ताच्च सर्वाणि रूपाणि जृणातिवत् (618) बोध्यानि। शुद्धधातौ जायमानानां कार्याणां प्रमाणमपि तत्रैव प्रतिपादितमिति तत एव ज्ञेयम्।

जारकः-रिका, [1]जरकः-रिका; जरीता-जरिता-त्री जरयिता-त्री;
[2]जीर्यन्-न्ती, जरयन्-न्ती; जरीष्यन्-जरिष्यन्-न्ती-ती, जरयिष्यन्-न्ती-ती;

---

1. 'जनीजॄष्क्नसुरञ्जोऽमन्ताश्च' (ग. सू. भ्वादौ) इति मित्त्वम्। तेन, 'मितां ह्रस्वः' (6-4-92) इत्युपधाया ह्रस्वो भवति। एवं सर्वत्र ण्यन्ते बोध्यम्।
2. 'दिवादिभ्यः—' (3-1-69) इति श्यन् विकरणप्रत्ययः। इत्वे रपरत्वे च, 'हलि च' (8-2-77) इति दीर्घः। स्त्रियां 'शप्श्यनोर्नित्यम्' (7-1-81) इति नित्यं नुमागमः।

A. 'अजरद्वृषवद् विरिक्तपीडः पुनरभ्येत्य विशिष्टवित्ततापि।' धा. का. 3.49.